श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तविंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तविंशत्यधिकशततमः सर्गः ॥

## अयोध्यायां श्रीरामस्य सत्कारार्थमायोजनम्, श्रीरामं प्रत्युद्गन्तुमनसां सर्वेषां जनानां भरतेन सह नन्दिग्रामे गमनम्, श्रीरामस्यागमनं भरतादिभिः सह तस्य समागमः पुष्पकविमानस्य तेन कुबेरपार्श्वे प्रेषणं च

श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः।
हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा॥ **6.127.1** ॥

दैवतानि च सर्वाणि चैत्यानि नगरस्य च।
सुगन्धमाल्यैर्वादित्रैरर्चन्तु शुचयो नराः॥ **6.127.2** ॥

सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा।
सर्वे वादित्रकुशला गणिकाश्चैव सर्वशः॥ **6.127.3** ॥

राजदारास्तथामात्याः सैन्याः सेनाङ्गनागणाः।
ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः॥ **6.127.4** ॥

अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम्।
भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा॥ **6.127.5** ॥

विष्टीरनेकसाहस्रीश्चोदयामास भागशः।
समीकुरुत निम्नानि विषमाणि समानि च॥ **6.127.6** ॥

स्थानानि च निरस्यन्तां नन्दिग्रामादितः परम्।
सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा॥ **6.127.7** ॥

ततोऽभ्यवकिरन्त्वन्ये लाजैः पुष्पैश्च सर्वतः।
समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ॥ **6.127.8** ॥

शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति।
स्रग्दाममुक्तपुष्पैश्च सुवर्णैः पञ्चवर्णकैः ॥ **6.127.9** ॥

राजमार्गमसम्बाधं किरन्तु शतशो नराः।
ततस्तच्छासनं श्रुत्वा शत्रुघ्नस्य मुदान्विताः ॥ **6.127.10** ॥

धृष्टिर्जयन्तो विजयः सिद्धार्थश्चार्थसाधकः।
अशोको मन्त्रपालश्च सुमन्त्रश्चापि निर्ययुः ॥ **6.127.11** ॥

मत्तैर्नागसहस्रैश्च सध्वजैः सुविभूषितैः।
अपरे हेमकक्षाभिः सगजाभिः करेणुभिः ॥ **6.127.12** ॥

निर्ययुस्तुरगाक्रान्ता रथैश्च सुमहारथाः।
शक्त्यृष्टिपाशहस्तानां सध्वजानां पताकिनाम् ॥ **6.127.13** ॥

तुरगाणां सहस्रैश्च मुख्यैर्मुख्यतरान्वितैः।
पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ **6.127.14** ॥

ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः।
कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥ **6.127.15** ॥

कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् ॥ **6.127.16** ॥

द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः।
माल्यमोदकहस्तैश्च मन्त्रिभिर्भरतो वृतः ॥ **6.127.17** ॥

शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिनन्दितः।
आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ॥ **6.127.18** ॥

पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम्।
शुक्ले च वालव्यजने राजार्हे हेममूषिते॥ **6.127.19**॥

उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः।
भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः॥ **6.127.20**॥

प्रत्युद्ययौ यदा रामं महात्मा सचिवैः सह।
अश्वानां खुरशब्दैश्च रथनेमिस्वनेन च॥ **6.127.21**॥

शङ्खदुन्दुभिनादेन सञ्चचालेव मेदिनी।
गजानां बृंहितैश्चापि शङ्खदुन्दुभिनिःस्वनैः॥ **6.127.22**॥

कृत्स्नं तु नगरं तत् तु नन्दिग्राममुपागमत्।
समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम्॥ **6.127.23**॥

कच्चिन्न खलु कापेयी सेव्यते चलचित्तता।
नहि पश्यामि काकुत्स्थं राममार्यं परन्तपम्॥ **6.127.24**॥

कच्चिन्न चानुदृश्यन्ते कपयः कामरूपिणः।
अथैवमुक्ते वचने हनूमानिदमब्रवीत्॥ **6.127.25**॥

अर्थ्यं विज्ञापयन्नेव भरतं सत्यविक्रमम्।
सदाफलान् कुसुमितान् वृक्षान् प्राप्य मधुस्रवान्॥ **6.127.26**॥

भरद्वाजप्रसादेन मत्तभ्रमरनादितान्।
तस्य चैव वरो दत्तो वासवेन परन्तप॥ **6.127.27**॥

ससैन्यस्य तदातिथ्यं कृतं सर्वगुणान्वितम्।
निःस्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम्॥ **6.127.28**॥

मन्ये वानरसेना सा नदीं तरति गोमतीम्।
रजोवर्षं समुद्भूतं पश्य सालवनं प्रति॥ **6.127.29**॥

मन्ये सालवनं रम्यं लोलयन्ति प्लवङ्गमाः।
तदेतद् दृश्यते दूराद् विमानं चन्द्रसन्निभम्॥ **6.127.30** ॥

विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम्।
रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना॥ **6.127.31** ॥

तरुणादित्यसङ्काशं विमानं रामवाहनम्।
धनदस्य प्रसादेन दिव्यमेतन्मनोजवम्॥ **6.127.32** ॥

एतस्मिन् भ्रातरौ वीरौ वैदेह्या सह राघवौ।
सुग्रीवश्च महातेजा राक्षसश्च विभीषणः॥ **6.127.33** ॥

ततो हर्षसमुद्भूतो निःस्वनो दिवमस्पृशत्।
स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते॥ **6.127.34** ॥

रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः।
ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे॥ **6.127.35** ॥

प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः।
यथार्थेनार्घ्यपाद्याद्यैस्ततो राममपूजयत्॥ **6.127.36** ॥

मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः।
रराज पृथुदीर्घाक्षो वज्रपाणिरिवामरः॥ **6.127.37** ॥

ततो विमानाग्रगतं भरतो भ्रातरं तदा।
ववन्दे प्रणतो रामं मेरुस्थमिव भास्करम्॥ **6.127.38** ॥

ततो रामाभ्यनुज्ञातं तद् विमानमनुत्तमम्।
हंसयुक्तं महावेगं निपपात महीतलम्॥ **6.127.39** ॥

आरोपितो विमानं तद् भरतः सत्यविक्रमः।
राममासाद्य मुदितः पुनरेवाभ्यवादयत्॥ **6.127.40** ॥

तं समुत्थाय काकुत्स्थश्चिरस्याक्षिपथं गतम्।
अङ्के भरतमारोप्य मुदितः परिषस्वजे ॥ **6.127.41** ॥

ततो लक्ष्मणमासाद्य वैदेहीं च परन्तपः।
अथाभ्यवादयत् प्रीतो भरतो नाम चाब्रवीत् ॥ **6.127.42** ॥

सुग्रीवं केकयीपुत्रो जाम्बवन्तमथाङ्गदम्।
मैन्दं च द्विविदं नीलमृषभं चैव सस्वजे ॥ **6.127.43** ॥

सुषेणं च नलं चैव गवाक्षं गन्धमादनम्।
शरभं पनसं चैव परितः परिषस्वजे ॥ **6.127.44** ॥

ते कृत्वा मानुषं रूपं वानराः कामरूपिणः।
कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा ॥ **6.127.45** ॥

अथाब्रवीद् राजपुत्रः सुग्रीवं वानरर्षभम्।
परिष्वज्य महातेजा भरतो धर्मिणां वरः ॥ **6.127.46** ॥

त्वमस्माकं चतुर्णां वै भ्राता सुग्रीव पञ्चमः।
सौहृदाज्जायते मित्रमपकारोऽरिलक्षणम् ॥ **6.127.47** ॥

विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत्।
दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम् ॥ **6.127.48** ॥

शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम्।
सीतायाश्चरणौ वीरो विनयादभ्यवादयत् ॥ **6.127.49** ॥

रामो मातरमासाद्य विवर्णां शोककर्शिताम्।
जग्राह प्रणतः पादौ मनो मातुः प्रहर्षयन् ॥ **6.127.50** ॥

अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम्।
स मातृश्च ततः सर्वाः पुरोहितमुपागमत् ॥ **6.127.51** ॥

स्वागतं ते महाबाहो कौसल्यानन्दवर्धन।
इति प्राञ्जलयः सर्वे नागरा राममब्रुवन्॥ **6.127.52** ॥

तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः।
व्याकोशानीव पद्मानि ददर्श भरताग्रजः॥ **6.127.53** ॥

पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम्।
चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित्॥ **6.127.54** ॥

अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः।
एतत् ते सकलं राज्यं न्यासं निर्यातितं मया॥ **6.127.55** ॥

अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः।
यत् त्वां पश्यामि राजानमयोध्यां पुनरागतम्॥ **6.127.56** ॥

अवेक्षतां भवान् कोशं कोष्ठागारं गृहं बलम्।
भवतस्तेजसा सर्वं कृतं दशगुणं मया॥ **6.127.57** ॥

तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम्।
मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः॥ **6.127.58** ॥

ततः प्रहर्षाद् भरतमङ्कमारोप्य राघवः।
ययौ तेन विमानेन ससैन्यो भरताश्रमम्॥ **6.127.59** ॥

भरताश्रममासाद्य ससैन्यो राघवस्तदा।
अवतीर्य विमानाग्रादवतस्थे महीतले॥ **6.127.60** ॥

अब्रवीत् तु तदा रामस्तद् विमानमनुत्तमम्।
वह वैश्रवणं देवमनुजानामि गम्यताम्॥ **6.127.61** ॥

ततो रामाभ्यनुज्ञातं तद् विमानमनुत्तमम्।
उत्तरां दिशमुद्दिश्य जगाम धनदालयम्॥ **6.127.62** ॥

विमानं पुष्पकं दिव्यं सङ्गृहीतं तु रक्षसा।
अगमद् धनदं वेगाद् रामवाक्यप्रचोदितम्॥ **6.127.63** ॥

पुरोहितस्यात्मसखस्य राघवो
    बृहस्पतेः शक्र इवामराधिपः।
निपीड्य पादौ पृथगासने शुभे
    सहैव तेनोपविवेश वीर्यवान्॥ **6.127.64** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
सप्तविंशत्यधिकशततमः सर्गः॥